दितिसुतः, पुं, (दितेः सुतः ।) दैत्यः । इत्यमरः । १ । १ । १२ ॥ (यथा, नैषधे । १६ । १५ ।
"दितिसुतगुरुः प्राणैर्योक्तुं न किं कचवत्क्षमः ॥")

दित्यः, पुं, (दितौ भवः । दिति+यत् ।) दैत्यः । इति शब्दार्थकल्पतरुः ॥ (छेदनार्हे धान्यादौ, क्ली । यथा, वाजसनेयसंहितायाम् ।१४।१०।
"दित्यवाड्वयो विराट् छन्दः ॥"
"दो ऽवखण्डने क्तिन्प्रत्ययः । दितिं खण्डन-मर्हति दित्यं धान्यं वहति दित्यवाट् ।" इति तद्भाष्ये महीधरः ॥)

दिद्युत्, त्रि, (द्योतते दीप्यतीति । द्युत्+"द्युति-गामिजुहोतीनां द्वे च ।" ३ । २ । १७८ । इत्यस्य वार्त्तिकोक्त्या क्विपि द्वित्वे "द्युतिस्वाप्योः सम्प्रसारणम् ।" ७ । ४ । ६७ । इत्यभ्यासस्य सम्प्रसारणम् ।) दीप्तिविशिष्टः । इति मुग्ध-बोधम् ॥ (स्त्री, दीप्तिः । यथा, ऋग्वेदे ।२।१३।७।
"यश्चासमा अजनो दिद्युतो दिवः ।"
"असमा विषमा नानाप्रकारा दिद्युतः दीप्तीर-जनः अजनयः ।" इति तद्भाष्ये सायनः ॥ वज्रम् । इति निघण्टुः ।२।२०॥ यथा, ऋग्वेदे । १ । ६६ । ७ ।
"अस्तुर्न दिद्युत्त्वेषप्रतीका ॥")

दिधिषाय्यः, पुं, (दधाति आनन्दमिति । धा+"दिधिषाय्यः ।" उणां ३ । ९७ । इति आय्यः धातोर्द्वित्वं इत्वं षुक् च ।) आरोपितबन्धुः ॥ इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (धारके, त्रि । यथा, ऋग्वेदे । २ । ४ । १ ।
"मित्र इव यो दिधिषाय्यो भूद्देव आदेवे जने जातवेदाः ॥"
"दिधिषाय्यो धारयिता भूत् ।" इति तद्भाष्ये सायनः ॥ उज्ज्वलदत्तस्तु "दधिषाय्यः" इति उणादिसूत्रं कल्पयित्वा दधिपूर्व्वात् स्यतेराय्यः षत्वञ्च इति व्याख्याय दधिषाय्यो घृतम् इत्युक्त-वान् ॥)

दिधिषुः, पुं, (दिधिं धैर्य्यं स्यतीति । सो+बाहुल-कात् कुः । यद्वा, दिधिषूं आत्मन इच्छतीति । सुप आत्मनः क्यच् । क्विप् । बाहुलकात् ह्रस्वः ।) दिरूढापतिः । इत्यमरः ।२।६।२३॥ (गर्भा-धानकर्त्ता । यथा, ऋग्वेदे । १० । १८ । ८ ।
"हस्तग्राभस्य दिधिषोस्तवेदं पत्युर्जनित्वमभि सं बभूथ ॥"
"दिधिषोर्गर्भस्य निधातुः ।" इति तद्भाष्ये सायनः ॥ यथा च भागवते । ६ । ६ । ३५ ।
"आज्ञप्तो वीक्ष्य दिधिषुं पुरुषादेन भक्षितम् । शोचन्त्यात्मानमुर्व्वीशमशपत् कुपिता सती ॥"
"दिधिषुं गर्भाधानकर्त्तारम् ।" इति श्रीधरः ॥) दिरूढायाम्, स्त्री । इति शब्दरत्नावली ॥ (धारके, त्रि । यथा, ऋग्वेदे । १० । ७८ । ५ ।
"अश्वासो न ये ज्येष्ठास आशवो दिधिषवो न रथ्यः सुदानवः ।"
"तथा दिधिषवो न वधूनां धारका इव ।" इति तद्भाष्ये सायनः ॥)

दिधिषूः, स्त्री, (दधाति पापं यद्वा दिधिं धैर्य्यं इन्द्रियदौर्ब्बल्यात् स्यति त्यजतीति । दा धा सो+"अन्दूदृम्फूजम्बूति ।" उणां । १ । ९५ । इति कूप्रत्ययेन साधुः ।) द्विरूढा । वारद्वयविवा-हिता स्त्री । तत्पर्य्यायः । दिधीषूः २ पुनर्भूः ३ दिधिषुः ४ । इति शब्दरत्नावली ॥ विवाहि-हितायां कनिष्ठायां सत्यां अविवाहिता ज्येष्ठा भगिनी । यथा, उद्वाहतत्त्वे ।
"ज्येष्ठायां विद्यमानायां कन्यायामुह्यतेऽनुजा । सा चाग्रेदिधिषूर्ज्ञेया पूर्व्वा च दिधिषूः स्मृता ॥"
(धारके, त्रि । यथा, ऋग्वेदे । १ । ७१ । ३ ।
"दधन्नृतं धनयन्नस्य धीतिमादिदर्य्यो दिधिष्वो विभृत्राः ॥")

दिधिषूपतिः, पुं, दिधिषूर्द्विरूढा तस्याः पतिः स्वामी । द्विरूढापतिः । (यथा, मनुः ।३।१७३।
"भ्रातुर्मृतस्य भार्य्यायां योऽनुरज्येत कामतः । धर्म्मेणापि नियुक्तायां स ज्ञेयो दिधिषूपतिः ॥")

दिनं, क्ली, (द्यति खण्डयति महाकालमिति । दो छेदे+"बहुलमन्यत्रापि ।" उणां २ । ४९ । इति इनच् ।) कालविशेषः । तत्पर्य्यायः । घस्रः २ अहः ३ दिवसः ४ वासरः ५ । इत्य-मरः ।१। ४ ।२॥ भास्करः६ दिवा७ । इति राज-निर्घण्टः ॥ वारः ८ अंशकः ९ द्युः १० अंशकम् ११ । इति शब्दरत्नावली ॥ (यथा, रघुः । ३।८।
"दिनेषु गच्छत्सु नितान्तपीवरं तदीयमालीनमुखं स्तनद्वयम् ॥")
तत्तु मनुष्यमाने षष्टिदण्डात्मकम् । पितृमाने गौणचान्द्रमासात्मकम् । देवासुरमाने वत्सरा-त्मकम् । ब्रह्ममाने दिव्यद्विसहस्रयुगात्मकम् । मनुष्यमाने ब्रह्मणो दिनस्य संख्या ।८,६४०,०००, ००० । इति पुराणम् ॥ तदेव मनुष्याणां सौर-सावनचान्द्रनाक्षत्रभेदेन चतुर्व्विधम् । यथा,—
सावनं दण्डाः षष्टिरहः स्वस्वखगुणांशाढ्या-स्तदैनं भवेत् । १ ।
उदयादोदयाद्भानोर्भौमसावनवासरः । २ ।
तिथिनैकेन दिवसश्चान्द्रमाने प्रकीर्त्तितः । ३ ।
आयुर्द्दाये स्मृतं प्राज्ञैर्नाक्षत्रं षष्टिनाडिकम् ॥४॥
जीमूतवाहनमते तु सूर्य्यकिरणावच्छिन्नचतु-र्यामयुक्तम् ॥

दिनं, क्ली, (दो छेदे+इनच् ।) सूर्य्यकिरणा-वच्छिन्नकालः । तद्वैदिकपर्य्यायः । वस्तोः १ द्युः २ भानुः ३ वासरम् ४ स्वसराणि ५ घ्रंसः ६ घर्म्मः ७ घृणः ८ दिनम् ९ दिवा १० दिवे-दिवे ११ द्यविद्यवि १२ । इति द्वादशाहर्नामानि । इति वेदनिघण्टौ १ अध्यायः ॥ * ॥ सिंह-कन्यातुलावृश्चिककुम्भमीनलग्नानि । यथा,—
"अजगोपतियुग्मञ्च कर्किधन्विमृगास्तथा । निशासंज्ञाः स्मृतास्त्वेते शेषाश्चान्ये दिनात्मकाः ॥" इति ज्योतिस्तत्त्वम् ॥

दिनकरः, पुं, (करोतीति । कृ+अच् । दिनस्य करः ।) सूर्य्यः । इति हेमचन्द्रः । २ । ११ ॥ (यथा, ऋतुसंहारे । १ । २२ ।
"दिनकरपरितापात् क्षीणतोयाः समन्तात् विदधति भयमुच्चैर्व्वीक्ष्यमाणा वनान्ताः ॥")

दिनकरात्मजा, स्त्री, (दिनकरस्य सूर्य्यस्य आत्मजा ।) यमुना । इति हलायुधः ॥

दिनकेशरः, पुं, (दिनस्य केशर इव ।) अन्धकारः । इति शब्दरत्नावली ॥

दिनज्योतिः, [स्] क्ली, (दिनस्य ज्योतिः ।) आतपः । इति राजनिर्घण्टः ॥

दिनदुःखितः, पुं, स्त्री; (दिने दिवसे दुःखितः । दिवाभागे वियोगित्वात्तथात्वम् ।) चक्रवाकः । इति शब्दरत्नावली ॥

दिनप्रणीः, पुं, (दिनं प्रणयतीति । प्र+नी+क्विप् ।) सूर्य्यः । इति त्रिकाण्डशेषः ॥ (अर्क-वृक्षः । सूर्य्यपर्य्यायत्वात् ॥)

दिनबलः, पुं, (दिने बलं यस्य ।) पञ्चमषष्ठसप्त-माष्टमैकादशद्वादशराशयः । इति ज्योतिषम् ॥ (सूर्य्यगुरुशुक्रग्रहाः । इति बृहज्जातकम् ॥)

दिनमणिः, पुं, (दिनस्य मणिरिव ।) सूर्य्यः । इति त्रिकाण्डशेषः ॥ (यथा, गीतगोविन्दे ।१।१८।
"दिनमणिमण्डलमण्डन ! भवखण्डन मुनिजनमानसहंस ! जय जय देव हरे ! ॥"
अर्कवृक्षः । सूर्य्यपर्य्यायत्वात् ॥)

दिनमूर्द्धा, [न्] पुं, (दिनस्य मूर्द्धा मस्तकमिव । दिनस्य आदिस्थानत्वादस्य तथात्वम् ।) पूर्व्वाद्रिः । उदयाचलः । इति त्रिकाण्डशेषः ॥

दिनांशः, पुं, (दिनस्य अंशः ।) प्रातर्मध्याह्ना-पराह्णसायाह्नादिः । इति राजनिर्घण्टः ॥

दिनादिः, पुं, (दिनस्य आदिः ।) प्रभातम् । इति राजनिर्घण्टः ॥

दिनान्तः, पुं, (दिनस्य अन्तः ।) सायम् । दिनाव-सानम् । इत्यमरः । १ । ४ । ३ । (यथा, ऋतु-संहारे । १ । १ ।
"दिनान्तरम्योऽभ्युपशान्तमन्मथो निदाघकालः समुपागतः प्रिये ! ॥")

दिनान्तकः, पुं, (दिनस्य अन्तकः नाशकः ।) अन्ध-कारः । इति त्रिकाण्डशेषः ॥

दिनावसानं, क्ली, (दिनस्य अवसानं यत्र ।) दिनान्तः । इति हेमचन्द्रः । २ । ५४ ॥ (यथा, रघुः । २ । ४५ ।
"दिनावसानोत्सुकबालवत्सा विसृज्यतां धेनुरियं महर्षेः ॥")

दिनिका, स्त्री, (दिनं भृत्यहेतुतया अस्त्यस्येति । दिन+ठन् ।) एकदिनकृतकर्म्ममूल्यम् । इति शब्दमाला ॥

दिन्भ, क ङ संघाते । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सकं-सेट् ।) क ङ, दिम्भयते । सङ्घातो राशीकरणम् । इति दुर्गादासः ॥

दिभ, इ क नोदे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) इ क, दिम्भयति । नोदः प्रेर-णम् । इति दुर्गादासः ॥

दिम्प, ञ क संघाते । इति कविकल्पद्रुमः ॥ (चुरां-उभं-सकं-सेट् ।) ओष्ठ्यवर्गशेषोपधः । इतीय-